# अथ संस्कृत भाषा प्रस्तावः

डॉ. सुरेन्द्र कुमार शर्मा

भाषा नाम मनुष्यवाग्व्यवसितं शब्दार्थयुग्मातिम्
अन्योऽन्यस्य विचारबोधनपरं यद्वक्तृबोद्धव्ययोः।
वर्णैः शब्दपदक्रमोपरचितैर्वाक्यात्मनोच्चारितैः
तत्तद्भाषणपद्धतेर्नियमतो यत्रास्ति वाग्विस्तरः।।1।।

तत्तद्देशविशेषमानवकुलैराजीवनं भाषिता
भाषा यद्यपि यत्र तत्र शतशो लोके प्रसिद्धिं गताः।
अस्माभिस्तु निसर्गसुन्दरतरं भाषोत्तमं संस्कृतं
साङ्गोपाङ्गविचारगोचरतया प्रस्तूयते साम्प्रतम्।।2।।

सृष्ट्यादौ परमेश्वरेण गुरुणा ब्रह्मर्षिसन्देशिते
वेदाङ्गैरभिवर्धिता सुमहिता या सभ्यता संस्कृतिः।
सैषा सन्निहिता सनातनतया सम्भाषिते संस्कृते
तत्सौन्दर्यदिदृक्षवो यदि वयं तत् संस्कृतं सेव्यताम्।।3।।

यां वाचं समुपासते दिविषदो विश्वे विधात्रादयो
यस्यामायतते हविः क्रतुभुजां धर्म्यं च कर्माखिलम्।
यामाराध्य नृपा नरा यतिवरा स्वाभीष्टसिद्ध्यै पुरा
तां कल्याणमयीमुतामृतमयीं दैवीं गिरं राध्नुमः।।4।।

अस्मत्पूर्वजविश्ववन्द्यविदुषां या ब्रह्मविद्या परा
विज्ञानं च मनुष्यजीवनकृते यद्यत् समाविष्कृतम्।
चित्ताह्लादकरः कलासमुदयो विश्वप्रशस्तो हि यः
सर्वं संस्कृतगर्भितं कथमिदं ज्ञेयं विना संस्कृतम्।।5।।

आर्ये विश्वप्रशंसितोत्तमगुणा स्वा: सभ्यता संस्कृति:
ज्ञातुं चानुविधातुमद्य सुशका सा संस्कृतेनैव भो:।
अन्ये चापि तदार्यसंस्कृतिगुणान् जिज्ञासमाना यदि
तत्तेषां हि कृतेऽपि संस्कृतपरिज्ञानं महावश्यकम्।।6।।

आर्याणां तु कृते हि संस्कृतमिदं स्यादात्मभाषोत्तमं
तत्तेषां परमं धनं च परमो गर्वाभिमानोत्सव:।
लोके संस्कृतभारती हि परमा शोभाऽर्यजात्यास्त्विह
तस्मादार्यपरम्परासुपुरुषैर्ज्ञेयं सदा संस्कृतम्।।7।।

*प्राचार्यचरः,*
*श्री दादू आचार्य संस्कृत महाविद्यालय, जयपुर*